अर्द्धवार्षिक परीक्षा 2021–22

कक्षा – दसवी

विषय – संस्कृत

समय–3 घण्टे पूर्णांक – 80

निर्देशाः :–

(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नानां सम्मुखे अङ्काः प्रदत्तः।

प्रश्न 1 उचित विकल्प चित्वा लिखत– (1x7=7)

(i) 'पठितः' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) क्त (ब) क्तवतु (स) कत्वा (द) शतृ

(ii) 'धनवान' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) मतुत् (ब) क्तिन (स) मतुप् (द) स्त्री

(iii) 'अजा' इत्यस्मिन् पदे प्रत्ययः अस्ति–

(अ) टाप (ब) जाप् (स) भाप (द) ङाप्

(iv) 'ल्यप्' प्रत्ययस्य उदाहरणम् अस्ति–

(अ) विहस्य (ब) गतः (स) हन्तुं (द) गमनीयः

(v) 'कुण्डंलः सदाचारी ब्राह्मणः आसीत्' इत्यस्मिन् वाक्ये विशेषणपदम् अस्ति–

(अ) कुण्डलः (ब) सदाचारी ब्राह्मणः (स) आसीत् (द) कोऽपि नास्ति

(vi) 'श्रवणः पितृभक्तः आसीत्' इत्यस्मिन् वाक्ये विशेष्य पदम् अस्ति–

(अ) श्रंवणः (ब) पितृभक्तः (स) आसीत् (द) कोऽपि नास्ति

(vii) 'वृद्धा धेनुः दुग्धं न ददाति' इत्यस्मिन् वाक्ये विशेष्य पदम् अस्ति–

(अ) वृद्धा (ब) धेनुः (स) दुग्धं (द) ददाति

प्रश्न 2 एकपदेन उत्तरं संस्कृत भाषायां लिखत– (1x7=7)

(i) गुणी किं वेत्ति ?

(ii) मनुष्याणां महान् रिपुः कः ?

(iii) कृषकायः कः आसीय् ?

(iv) 'कृतज्ञता' पदस्य विलोमपदं किम्?

(v) 'मुखम्' इत्यस्य पदस्य पर्यायपदं लिखत?

(vi) 'सुलभः' पदस्य विलोमपदं किम्?

(vii) 'सूर्यः' पदस्य पर्यायपदं लिखत?

प्रश्न 3 कोष्ठकेषु प्रदत्तशब्दैः रिक्त स्थानानि पूरयत (1x6=6)



https://www.mpboardonline.com

(i) 'फल' शब्दस्य द्वितीया विभक्तेः शब्दरूपं .......... अस्ति। (फलं / फलां)

(ii) 'रमा' शब्दस्य तृतीया विभक्तेः शब्दरूपं .......... अस्ति। (रमां / रमयां)

(iii) 'बालकात्' पदे विभक्ति .......... अस्ति। (चतुर्थी / पंचमी)

(iv) 'मुनौ' पदे विभक्ति .............. अस्ति। (तृतीया / सप्तमी)

(v) 'प्राचार्यः' पदे उपसर्गः ............. अस्ति। (प्र / प्रा)

(vi) 'संस्कारः' पदे उपसर्गः ............. अस्ति। (सम् / सन्)

प्रश्न 4 शुद्धवाक्यानां समक्षम् 'आम्' अशुद्धवाक्यानां समक्षम् 'न' इति लिखत– (1x6=6)

(i) 'अवदन्' इत्यस्मिन् पदे एकवचनम् अस्ति।

(ii) 'पठन्ति' इत्यस्मिन् पदे बहुवचनम् अस्ति।

(iii) 'पास्यति' पदे लट्लकारः अस्ति।

(iv) 'हनिष्यति' पदे 'हन्' धातुः अस्ति।

(v) 'कथा' अव्ययपदम् अस्ति।

(vi) 'इदानीम्' अव्ययपदम् अस्ति।

प्रश्न 5 युग्म मेलनं कुरूत– (1x6=6)

| (अ) | (ब) |
|---|---|
| (i) सज्जनः | (क) इत्यादिः |
| (ii) मनः + हरः | (ख) अव्ययीभावः |
| (iii) पीताम्बरः | (ग) मनोहरः |
| (iv) यथाशक्ति | (घ) गुणसन्धि |
| (v) महेशः | (ङ) बहुव्रीहि |
| (vi) यण्सन्धिः | (च) व्यंजनसन्धिः |

प्रश्न 6 जनः किमर्थं पदातिः गच्छति? (2)

अथवा

व्याघ्रः किं विचार्य पलायितः?

प्रश्न 7 कवि कुत्र सञ्चरणं कर्तुम् इच्छति? (2)

अथवा

अन्ते सर्वे मिलित्वा कस्य राज्याभिषेकाय तत्पराः भवन्ति?

प्रश्न 8 अस्माभिः कीदृशः वृक्षः सेवितव्यः? (2)

अथवा

जरा कस्य सकाशं सहसा न समधिरोहति?



https://www.mpboardonline.com

प्रश्न 9 मातुः अधिका कृपा कस्मिन् भवति? (2)

अथवा

स्वस्थ जीवने कीदृशे वातावरणे भ्रमणीयम्?

प्रश्न 10 निधनः जनः कथं वित्तम् उपार्जितवान्? (2)

अथवा

मयूरः कथं भृत्यमुद्रायां स्थितः भवति?

प्रश्न 11 वस्तुतः चौरः कः आसीत् ? (2)

अथवा

अन्ते प्रकृतिमाता प्रविश्य सर्वप्रथमं किं वदति?

प्रश्न 12 वाच्यपरिवर्तन कुरुत (कोऽपि द्वे)? (2)

(i) कृषकः ग्राम गच्छति। (कर्मवाच्ये)

(ii) मया पुस्तकं पठ्यते। (कर्तृवाच्ये)

(iii) रमा पत्रं लिखति। (कर्मवाच्ये)

प्रश्न 13 अधोलिखितानि वाक्यानि कः कं प्रति कथयति– (कोऽपि द्वे)? (2)

(i) बहून्यपत्यानि मे सन्तीति सत्यम्।

(ii) मामप्येवमेवातुदन् एते वानराः।

(iii) भवान् कुतः भयात् पलायितः।

प्रश्न 14 रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत (कोऽपि द्वे)? (2)

(i) मयूरस्य नृत्यं प्रकृतेः आराधना।

(ii) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(iii) गात्राणां सुविभक्तता व्यायामेन सम्भवति।

प्रश्न 15 अधोलिखितेषु द्वयोः अशुद्ध कारक वाक्ययोः शुद्धिःकरणीया (2)

(i) शिवं नमः।

(ii) कृष्णं नवनीतं रोचते।

(iii) कृषकः ग्रामे गच्छति।

(iv) सैनिकः अश्वेन पतति।

प्रश्न 16 अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

कश्चन् निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकूलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।

(i) कीदृशः जनः परिश्रमं करोति?

(ii) रात्री निवासं कर्तुं सः कुत्र अगच्छत्?

(iii) पिता किमर्थं व्याकुलं जातः।



https://www.mpboardonline.com

अथवा

"भोवासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि। सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारम् उद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न?" इति प्रत्यवोचत्।"भद्रे! नूनम्। सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम्?" इति इन्द्रेणपृष्टा सुरभिः प्रत्यवोचत्।

(i) सा पुत्रस्य किं दृष्ट्वा रोदिति?

(ii) पुत्रस्य दैन्यं दृष्ट्वा का अश्रुपूरितः?

(iii) कः कृच्छ्रेण भारम् उद्वहति?

प्रश्न 17 अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

श्रमक्लमपिपासोष्ण–शीतादीनां सहिष्णुता।

आरोग्यं चापि परमं व्यायामादुपजायते।।

(i) श्रमेण किं भवति ?

(ii) शरीरं व्यायामात् किम् उपजायते ?

(iii) आरोग्यं कस्मात् उपजायते ?

अथवा

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।

(i) केन समः बन्धुः न अस्ति ?

(ii) महान् रिपुः कः अस्ति ?

(iii) कं कृत्वा नरः न अवसीदति ?

प्रश्न 18 अधोलिखितं गद्यांशं पठित्वा तदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत– (3)

सिंहः :– (क्रोधेन गर्जन्) भोः! अहं वनराजः कि भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा।

एकः वानर :– यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि?

(i) कः कथयति अहं वनराजः अस्मि?

(ii) सर्वे मिलित्वा कं तुदन्ति?

(iii) 'भवान् तु भक्षकः' अस्मिन् वाक्ये अव्ययपदं किम् अस्ति?

अथवा

व्याघ्रचित्रकौ– अरे किं वनराजपदाय सुपात्रंचीयते? एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः :–तूष्णीं भव भोः। यूवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षक पद योग्यं न मन्यन्ते अतएव विचारविमर्शः प्रचलति।

वकः :– सर्वथा सम्यगुक्तम् सिंह महोदयेन । वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतं परमधुना तु कोऽपि पक्षी एवं राजेति निश्चेतव्यम् अत्र तु संशीति लेशस्यापि अवकाशः एवं नास्ति।



https://www.mpboardonline.com

(i) वन्यजीवा कं रक्षकपरयोग्यं न मन्यन्ते?

(ii) केन बहुकालपर्यन्तं वने शासनं कृतम्?

(iii) सिंह सदृशौ भक्षकौ कौ?

प्रश्न 19 प्रदत्तशब्दैः रिक्तस्थानानि पूरयत–(कोऽपि त्रयः ) (3)

(स्थितप्रज्ञः, व्यायामेन, यथासमयम्, अहिभुक)

(i) ................ सदृशं किञ्चित् स्थौल्यापकर्षणं नास्ति।

(ii) बकः अक्चिलः ........... इव तिष्ठति।

(iii) मयूरः .............. इति नाम्नाऽपि ज्ञायते।

(vi) सर्वेषामेव महत्वं विद्यते ............ ।

प्रश्न 20 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितश्लोकद्वयं लिखत– (4)

प्रश्न 21 स्वस्य प्राचार्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत। (4)

अथवा

स्वामित्रस्य कृते आमन्त्रणपत्रं संस्कृत भाषायां लिखत।

प्रश्न 22 अधोलिखितं अपठितगद्यांशं सम्यक् पठित्वा तदाधरितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत–(कोऽपि चत्वारः) (4)

संसारे जनाः सुखम् इच्छन्ति। सुखंच धनेन एव प्राप्तुं शक्यते। अतः धनोपार्जनस्य आवश्यकता भवति, यस्य पार्श्वे धनं भवति सः सुखेन शेते। निर्धनं पुरुषं तु मित्राणिअपि त्यजन्ति। चौर्येण कपटेन च प्राप्तं धनं विनाशकरं भवति। धनहीनोऽपि सुखीभवति। सुखं तु मनसा अनुभूयते। यत्र संतोषः तत्रैव वस्तुतः सुखम्।

(i) संसारे जनाः किम् इच्छन्ति?

(ii) सुखं कथं प्राप्तुं शक्यते?

(iii) कं पुरुषं मित्राणि अपि त्यजन्ति?

(iv) काभ्यां प्राप्तं धनं विनाशकरं भवति?

(v) वस्तुतः कुत्र सुखं वर्तते?

प्रश्न 23 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृतभाषायां निबन्धं लिखत– (4)

(i) संस्कृतभाषायाः महत्वम्

(ii) पर्यावरणम्

(iii) हिमालयः

(iv) भारतीया संस्कृतिः

https://www.mpboardonline.com
Whatsapp @ 9300930012
Send your old paper & get 10/-
अपने पुराने पेपर्स भेजे और 10 रुपये पायें,
Paytm or Google Pay से



https://www.mpboardonline.com